# Shri Subrahmanya Aparadhakshamapana Stotram

# श्रीसुब्रह्मण्यापराधक्षमापणस्तोत्रम्

## Document Information

Text title : subrahmaNyAparAdhakShamApaNastotram

File name : subrahmaNyAparAdhakShamApaNastotram.itx

Category : subrahmanya, aShTaka

Location : doc_subrahmanya

Latest update : September 18, 2022

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 18, 2022

*sanskritdocuments.org*

Shri Subrahmanya Aparadhakshamapana Stotram

# श्रीसुब्रह्मण्यापराधक्षमापणस्तोत्रम्

नमस्ते नमस्ते गुह तारकारे
    नमस्ते नमस्ते गुह शक्तिपाणे ।
नमस्ते नमस्ते गुह दिव्यमूर्ते
    क्षमस्व क्षमस्व समस्तापराधम् ॥ १॥

नमस्ते नमस्ते गुह दानवारे
    नमस्ते नमस्ते गुह चारुमूर्ते ।
नमस्ते नमस्ते गुह पुण्यमूर्ते
    क्षमस्व क्षमस्व समस्तापराधम् ॥ २॥

नमस्ते नमस्ते महेशात्मपुत्र
    नमस्ते नमस्ते मयूरासनस्थ ।
नमस्ते नमस्ते सरोभूत देव
    क्षमस्व क्षमस्व समस्तापराधम् ॥ ३॥

नमस्ते नमस्ते स्वयं ज्योतिरूप
    नमस्ते नमस्ते परं ज्योतिरूप ।
नमस्ते नमस्ते जगं ज्योतिरूप
    क्षमस्व क्षमस्व समस्तापराधम् ॥ ४॥

नमस्ते नमस्ते गुह मञ्जुगात्र
    नमस्ते नमस्ते गुह सच्चरित्र ।
नमस्ते नमस्ते गुह भक्तमित्र
    क्षमस्व क्षमस्व समस्तापराधम् ॥ ५॥

नमस्ते नमस्ते गुह लोकपाल
    नमस्ते नमस्ते गुह धर्मपाल ।
नमस्ते नमस्ते गुह सत्यपाल
    क्षमस्व क्षमस्व समस्तापराधम् ॥ ६॥

नमस्ते नमस्ते गुह लोकदीप
नमस्ते नमस्ते गुह बोधरूप ।
नमस्ते नमस्ते गुह गानलोल
क्षमस्व क्षमस्व समस्तापराधम् ॥ ७॥

नमस्ते नमस्ते महादेवसूनो
नमस्ते नमस्ते महामोहहारिन् ।
नमस्ते नमस्ते महारोगहारिन्
क्षमस्व क्षमस्व समस्तापराधम् ॥ ८॥

इति श्रीसुब्रह्मण्यापराधक्षमापणस्तोत्रम् ॥

*Shri Subrahmanya Aparadhakshamapana Stotram*

pdf was typeset on September 18, 2022

Please send corrections to *sanskrit@cheerful.com*